**A**

# SAMAGRA SHIKSHA, KERALA

**811**

## Second Terminal Evaluation - 2019-20

## First Language - Paper I - Part I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- VIII**

Time 1 ½ Hours | Total Score - 40

निर्देशाः -

- १५ निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्कनः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

---

**1. अधोदत्तानां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

क) दिलीपस्य वंशः कः ?

(चन्द्रवंशः, सूर्यवंशः, मौर्यवंशः, यदुवंशः )

ख) 'विहाय ' इत्यस्य समानार्थकपदं चित्वा लिखत।

(उषित्वा, त्यक्त्वा, नत्वा, गत्वा)

ग) भासविरचितं नाटकं किम्?

(वेणीसंहारम्, अभिज्ञानशाकुन्तलम्, ऊरुभङ्गम्, नागानन्दम्)

घ) किं गणे नान्तर्भवति ?

(रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयम्, कर्णभारम्)

**2. यथोचितं योजयत ।** 4x1=4

क) कालिदासः - नन्दिनी ।

ख) पार्थसारथिः - शिवः।

ग) भूतेश्वरः - कुमारसम्भवम्।

घ) दिलीपः - श्रीकृष्णः।

**3. उदाहरणानुसारं सन्धिच्छेदं लिखत।** 1x1=1

उदा- कूप एव - कूपः + एव।

क) लोक एव - ........... + ...........।

**4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** 1x1=1

क) गच्छ पुत्र! वृकोदरं ब्रूहि।

5. उदाहरणानुसारं विग्रहवाक्यं लिखत। 1x1=1

उदा- लोके भवम् - लौकिकम् ।

क) ............ - वैदिकम्।

6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत । 4x2=8

6. कोष्ठकात् समुचितं पदं चित्वा वाक्यं पूरयत ।

क) सज्जनः ................ बिभेति । (चोरात् / चोरम् )

ख) अहं मन्दिरम् ...................। (गच्छामि / गच्छति)

7. वाक्यं पठित्वा क्त्वान्त तुमुन्नन्तपदे चित्वा लिखत।

सीता प्रातः उत्थाय स्नानादिकं कृत्वा पाठान् पठितुम् आरभत।

8. "यः आसक्तिं कामम् अहङ्कारं ममतां च विना जीवति सः शान्तिं लभते" इति आशययुक्तं श्लोकं चित्वा लिखत ।

क) विहाय कामान्यः सर्वान्
पुमांश्चरति निस्पृहः।
निर्ममो निरहङ्कारः
स शान्तिमधिगच्छति।।

ख) इन्द्रियाणां हि चरतां
यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां
वायुर्नावमिवांभसि।।

9. उदाहरणानुसारं वाक्यं परिवर्त्य लिखत ।

उदा - लता गानं गायति । लता गानम् अगायत्।

क) कृष्णः गोशालां गच्छति । ................................. ।

10. अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत।

एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम्।।

गद्यक्रमः - एकातपत्रं जगतः ............ नवं वयः इदं कान्तं ............अल्पस्य हेतोः बहु हातुं............ त्वम् ............ मे प्रतिभासि।

11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

11. यथोचितं पट्टिकां पूरयत।

ऊरुभङ्गम्, वेदव्यासः, दिलीपः, वाल्मीकिः

| कृतिः | ग्रन्थकर्ता | कथापात्रम् |
|---|---|---|
| महाभारतम् | .............. | भीमसेनः |
| ................ | भासः | दुर्योधनः |
| रघुवंशम् | कालिदासः | ............. |
| रामायणम् | .............. | रामः |

12. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

प्रसादे सर्वदुःखानां
हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु
बुद्धिः पर्यवतिष्ठते।।

क) श्लोके 'प्रज्ञा' इत्यर्थकं पदं किम् ?

ख) रेखाङ्कितपदस्य पदच्छेदं लिखत।

ग) मनःप्रसादे केषां हानिः उपजायते?

घ) श्लोकात् एकं क्रियापदं चित्वा लिखत।

13. सूचनानुसारं रघुवंशम् अधिकृत्य टिप्पणीं लिखत ।

सूचनाः - पञ्चमहाकाव्यानि - कालिदासः - रघुवंशम् - - १९ सर्गाः - सूर्यवंशराजानां चरितम् ।

14. प्रादेशिकभाषया विवर्तयत। 1x5=5

कैरलीगानसाहित्यमण्डले प्रसिद्धो भवति वयलार् रामवर्मा । अस्य महोदयस्य स्मरणार्थं कश्चन साहित्यपुरस्कारः सर्वकारैः आयोजितः। 1977 तमे वर्षे आरब्धस्य अस्य पुरस्कारस्य नाम भवति वयलार् पुरस्कारः । कैरलीसाहित्यपुरस्कारेषु अन्यतमः भवति अयम् । प्रथमवयलार्पुरस्कारजेत्री भवति ललिताम्बिका अन्तर्जनम्।

15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत। 2x4=8

15 "त्वमेव जननी भव" इति पाठभागानुसारं सम्भाषणांशान् पूरयत ।

(पितरम्, भ्रातृशतम्, ब्रूहि, मास्तु)

धृतराष्ट्रः - पौत्र दुर्जय! ............. अन्वेषय।

दुर्जयः - आम् । पितरम् अन्विष्यामि।

(सः अत्र अस्ति इति उक्त्वा तस्य अङ्कम् आरोढुं प्रयतते।)

दुर्योधनः - ............ पुत्र । अहं ............ अनुगच्छामि।

दुर्जयः - अहमपि अनुगच्छामि ।

दुर्योधनः - भीमसेनं ................।

16. अधोदत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

महात्मागान्धी विश्वप्रसिद्धेषु त्यागिवर्येषु अन्यतमः भवति। सः गीतातत्त्वैः नितराम् आकृष्टः अभवत्। तस्य अहिंसासिद्धान्तः प्रसिद्ध एव। 'सत्यशोधनम्' इति आत्मकथाग्रन्थे अनेन 'मम जीवनमेव मम सन्देशः' इति प्रस्तूयते। 2019 तमे वर्षे अस्य महाभागस्य 150 तमो जन्मवर्षः विपुलतया आचर्यते।

क) महात्मागान्धी कैः आकृष्टः?

ख) सत्यशोधनम् इति अत्मकथाग्रन्थे किं प्रस्तूयते?

ग) महात्मागान्धिनः 150 तमो जन्मवर्षः कस्मिन् वर्षे आचर्यते?

घ) खण्डिकातः एकम् अव्ययपदं चित्वा लिखत।

17. सूचनाः उपयुज्य लौकिकन्यायं समर्थयत।

सूचनाः - कश्चन मण्डूकः कूपे ......... अन्यः मण्डूकः लोके .......... बाह्यलोकमधिकृत्य अज्ञानं ......... अल्पज्ञः सर्वज्ञभावं प्रकटयति।

******************